# Kashimahatmyam

# काशीमाहात्म्यम्

## Document Information

Text title : Kashimahatmyam

File name : kAshImAhAtmyam.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 12 | 405-441||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# काशीमाहात्म्यम्

- शिवपार्वतीसंवादे -
काशीनिवासिनां धर्माविहिताः सन्ति भूरिशः ।
तान् कृत्त्वा विधिवत्काश्यां वासः कार्यो नरोत्तमैः ॥ ४०५॥

उक्ताचार रतैःकाश्यां स्थातव्यं धर्मतत्परैः ।
अन्यैर्नस्थेयममले सत्यं सत्यं न संशयः ॥ ४०६॥

बहुयत्नेन साकाशी प्राप्तव्या मोक्षदा परा ।
विना काशीनिवासेन मोक्षस्तु न भविष्यति ॥ ४०७॥

काश्यामप्यति यत्नेन स्थातव्यं धर्मतत्परैः ।
अधर्मलेशरहितैः सर्वदा शिवपूजकैः ॥ ४०८॥

काशीतिस्मरणादेव महापातक कोटयः ।
क्षणाच्छिवे विनश्यन्ति सा काशी क्वोपमीयते ॥ ४०९॥

यस्याः स्मरणमात्रेण पुनर्जन्म न विद्यते ।
दुष्टस्यापि महादेवि सा काशी क्वोपमीयते ॥ ४१०॥

यस्याः स्मरणमिच्छन्ति ब्रह्मविष्ण्वादयः सुराः ।
शिवाकारासुराराध्या सा काशी क्वोपमीयते ॥ ४११॥

काकादयोऽपि काशीस्था गणयन्त्येव नामरान् ।
तादृशी दिव्यरूपाहि सा काशी क्वोपमीयते ॥ ४१२॥

यस्यां काश्यां मृतानां तु मरणं मङ्गलायते ।
दिव्याशनायते पर्णं सा काशी क्वोपमीयते ॥ ४१३॥

यस्यां काश्यां जलं पीत्वा सोमपान् प्रतिवासरम् ।
तिरस्करोति काकोऽपि सा काशी क्वोपमीयते ॥ ४१४॥

यस्यां क्षौमायते चीरं विभूतिश्चन्दनायते ।

दिव्यामृतायते नीरं साकाशी क्वोपमीयते ॥ ४१५॥

यस्यां रुद्राक्षमालापि रत्नमालायते सदा ।
सुखशय्यायते घासः सा काशी क्वोपमीयते ॥ ४१६॥

यस्यां तृणासनं शुभ्रं रत्नसिह्मासनायते ।
चक्रेश्वरायते दीनः सा काशी क्वोपमीयते ॥ ४१७॥

यस्यां धन विहीनोऽपि दरिद्रोमनुजाधमः ।
तिरस्करोति धनदं सा काशी क्वोपमीयते ॥ ४१८॥

यावन्तो मुक्तिमिच्छन्ति देवर्षिमुनिमानवाः ।
तावतामपि सर्वेषां गतिः काश्येव सर्वथा ॥ ४१९॥

काशी कल्पतरुर्नित्यं मुक्तिपुष्पफलान्वितः ।
मुमुक्षवोऽनिशं तत्र वसन्ति समुपाश्रिताः ॥ ४२०॥

काश्यामेव मुनिश्रेष्ठैः स्थातव्यं धर्मतत्परैः ।
विना काशीं न चान्यत्र मोक्षो भवति सर्वथा ॥ ४२१॥

अनन्तकालममलेऽनन्तजिह्वाभिरेव वा ।
काशी प्रभावो न मया शक्यते वक्तुमम्बिके ॥ ४२२॥

वेदैरपि न विज्ञातं काशीतत्त्वं वरानने ।
किं पुनर्विधिविष्ण्वाद्यैः शुद्धैर्मुनिवरैरपि ॥ ४२३॥

काशीस्तुतिपरा जिह्वा धन्या धन्या वरानने ।
काशीध्यान परं धन्यं धन्यं धन्यं मनः सदा ॥ ४२४॥

इदं पुण्य समृद्ध्यर्थं कथा पापौघनाशिनी ।
श्रोतव्या नियतैः काश्यामतियत्नेन मानवैः ॥ ४२५॥

यस्त्वेतान्नित्यमध्यायान्पठिष्यति शिवालये ।
स महापातकेभ्योऽपि मुच्यते नात्र संशयः ॥ ४२६॥

यः काश्यां कृतपापोऽपि मानुष्यो नित्यमादरात् ।
एतान्पठित्वाह्यध्यायान्सपापेभ्यो विमुच्यते ॥ ४२७॥

काश्यां तु कृतपापानि प्रत्यहं मुदितानने ।
प्रत्यहाध्यायपाठेन विनश्यन्ति न संशयः ॥ ४२८॥

सहस्त्रवारमध्यायाः पठिता मुनि सत्तमैः ।
काश्यां पुराकृतं पापनाशयन्त्यग्नि सन्निभाः ॥ ४२९॥

सहस्त्रवारमध्यायान्पठित्वैव तिलादिभिः ।
तन्मन्त्रैर्लक्षहोमोऽपि कार्यस्तत्पापनाशकः ॥ ४३०॥

काशीमाहात्म्यममलमिदं प्रत्यहमादरात् ।
यः पठेद्यातना तस्य न भविष्यति भैरवि ॥ ४३१॥

इदं माहात्म्यममलं कालभैरव सन्निधौ ।
प्रत्यष्टम्यां प्रयत्नेन पठनीयं विशेषतः ॥ ४३२॥

एतच्छ्लोक महामन्त्रं लक्षावृत्त्या तिलादिभिः ।
शिवनिन्दाघशान्त्यर्थं होमः कार्यः प्रयत्नतः ॥ ४३३॥

बिल्वाश्वत्थपलाशादि समिदाज्यान्वितास्तिलाः ।
तद्धोम साधनीभूता शुद्धाः कीटाद्यदूषिताः ॥ ४३४॥

स्वस्वशाखोक्तमार्गेण प्रतिष्ठाप्य हुताशनम् ।
तस्मिन्नग्नौ यथा शास्त्रं होमः कार्यो द्विजोत्तमैः ॥ ४३५॥

काशीमाहात्म्य मन्त्रस्य महादेवः स्वयमृषिः ।
काश्येव देवता शक्तिर्भैरवी यातनापहा ॥ ४३६॥

कीलकं सर्वयत्नेन काशीप्राप्तिरिहेप्सिता ।
छन्दोऽनुष्टुप्फलं दिव्यं मोक्षरूपमुदाहृतम् ॥ ४३७॥

सहस्त्रवदनां दिव्यां सहस्त्राक्षि करान्विताम् ।
विराड्रूपधरां नित्यां ध्यायेत्काश्यधिदेवताम् ॥ ४३८॥

श्लोकमुच्चार्य तदनु काश्यैस्वाहेति चाहुतिः ।
देवा भवन्ति यज्ञेन याज्ञिकैर्होमकर्मणि ॥ ४३९॥

दश षट् द्वादशावृत्या तच्छ्लोकानां यथाक्रमम् ।
भोजनीयाः द्विजाःश्रेष्ठा देयास्याद्दक्षिणा यथा ॥ ४४०॥

काशीमाहात्म्यममलं लिखित्वा पुस्तके शुभे ।
देयं शैवाय लिङ्गं च ससाधनमनुत्तमम् ॥ ४४१॥

॥ इति शिवरहस्यान्तर्गते काशीमाहात्म्यं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः १२ । ४०५-४४१ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 12 . 405-441..

Notes:

ŚivaRahasyam saptāṃśaḥ शिवरहस्यं सप्तांशः has descriptions about and the merits of pilgrimage to and residing in Kaśī काशी, that constitute Kaśīmāhātmyam काशीमाहात्म्यम्. Śiva शिव to Pārvatī पार्वती summarizes the merits of listening to and reading of the text of Kaśīmāhātmyam काशीमाहात्म्यम्.

Proofread by Ruma Dewan

---

*Kashimahatmyam*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*